International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 299-301
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 20-04-2026
Publish : 21-04-2026

**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कोलुसु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयसंस्कृतौ स्तोत्रकाव्यपरम्परा

**कोलुसु गोविन्दराजुलु**

**सारांशः** - अस्मिन् शोधलेखे 'भारतीयसंस्कृतौ स्तोत्रकाव्यपरम्परा' इत्यमुं विषयमधिकृत्य विस्तरेण विवृतम् । देवतानां गुणकर्मप्रशंसार्थकस्य 'स्तोत्र'शब्दस्य व्युत्पत्तिं प्रदर्श्य, अस्य मुख्यानि प्रयोजनानि (मानसिकशान्तिः, पापमुक्तिः, अभ्युदयसिद्धिश्च) अग्निपुराण-विष्णुसहस्रनामस्तोत्रयोः प्रमाणैः सह प्रतिपादितवन्तः। अलङ्कारशास्त्रदृष्ट्या स्तोत्रकाव्यं श्रव्यकाव्यकोटौ (विशेषतः मुक्तकपरम्परायाम्) अन्तर्भवति । पूर्वाचार्यैः नमस्कार-आशीः-सिद्धान्त-पराक्रम-विभूति-प्रार्थना इति षड्विधं स्तोत्रलक्षणं प्रोक्तम्। ऐतिहासिकविकाशक्रममधिकृत्य वेदेभ्यः आरभ्य उपनिषत्सु, स्मृतिषु, पुराणेषु, महाकाव्येषु च उपलभ्यमानस्य स्तोत्रवाङ्मयस्य विवृतिः कृता। निष्कर्षतः, भारतीयवाङ्मये वैदिक-पौराणिक-काव्यगतादिभेदेन पञ्चधा विभक्ता एषा स्तोत्रकाव्यपरम्परा आदिकालात् आधुनिककालं यावत् भक्तिरसधारया सहृदयानां चेतांसि आह्लादयन्ती देदीप्यते ।

**कूटशब्दाः** – स्तोत्रपरम्परा, व्युत्पत्तिः, फलश्रुतिः, श्रव्यकाव्यम्, मुक्तकम्, स्तोत्रलक्षणम्, शस्त्रम्, पौराणिकस्तोत्राणि, भक्तिरसः, समीक्षा ।

कविकुलश्रेष्ठः कालिदासः कुमारसम्भवे दशमसर्गे लिखति -

**वचोभिर्मधुरैस्ससार्थैर्विनम्रेण मया स्तुतः ।**
**प्रीतिमानभवद्देवः स्तोत्रं कस्य न तुष्टये ।।**

अनेन ज्ञायते यद्देवाः, दानवाः, मानवाः, गन्धर्वाः, किन्नराः, सर्वेऽपि स्तोत्रद्वारा सन्तुष्टाः भवन्ति । तदर्थमेव विपद्ग्रस्ताः मानवाः मुक्त्यर्थं, शान्त्यर्थं वा देवदेवीनां प्रसन्नाय स्तोत्राणि कुर्वन्ति । किं नाम तत्स्तोत्रम् ? अथवा का नाम स्तुतिः ? इति विचार्यः विषयः।

## स्तुति/स्तोत्रशब्दस्य व्युत्पत्तिः

अदादिगणे स्तुञ् स्तुतौ इति धातोः "दाम्नीशसयुयुजस्तुतुदसिसियमिहपतदशनहः करणे" इति पाणिनीयसूत्रेण ष्ट्रन्-प्रत्यये कृते स्तोत्रशब्दः निष्पद्यते । स्तूयन्ते देवताः अनेन इति स्तोत्रम् । अर्थात् येन भगवतः गुणकर्मादि प्रतिपाद्यते तत्स्तोत्रमिति उच्यते । अमरकोशे नपुंसकलिङ्गे स्तोत्रशब्दः गुणकर्मादिभिः प्रशंसने अर्थे प्रयुज्यते । अस्य चत्वारः पर्यायवाचिनः शब्दाः तत्र प्रोक्ताः । यथा –

**"स्तवः स्तोत्रं स्तुतिर्नुतिः"**[1] ।

## स्तोत्राणां प्रयोजनम्

संस्कृतवाङ्मये उपलभ्यमानानां स्तोत्राणाम् अन्ते तत्तत्स्तोत्रस्य फलश्रुतिः अवश्यं क्रियते। स्तोत्राणां पठनेन जनानां कृते मानसिकशान्तिः लभ्यते । सर्वे शान्तिं, सुखम् अनुभवन्ति । आयुरारोग्यधनधान्यैः भक्ताः समृद्धिं प्राप्नुवन्ति । पाठकानां प्रज्ञा वर्धते, चित्तशुद्धिः, मानसोल्लासः, बौद्धिकविकासः सम्पद्यते । स्तोत्रमाध्यमेन अभ्युदयः निःश्रयससिद्धिः भवति ।
अग्निपुराणे उच्यते –

**पापप्रणासनं स्तोत्रं यः पठेच्छ्रुणुयादपि ।**
**शारीरैर्मानसैर्वाग्जैः कृतैः पापैः प्रमुच्यते ।।**
**सर्वपापग्रहादिभ्यो भाति विष्णोः परं पदम् ।**
**तस्मात्पापे कृते जप्यं स्तोत्रं सर्वाघमर्दनम् ।।**
**प्रायश्चित्तमघौघानां स्तोत्रं व्रतकृते वरम् ।**
**प्रायश्चित्तैः स्तोत्रजपैर्व्रतैर्नश्यति पातकम् ।।**[2]

विष्णुसहस्रनामस्तोत्रे तत्स्तोत्रस्य माहात्म्यं प्रयोजनं च अन्ते सुष्ठु उपन्यस्तम् । तत्र उच्यते यत् यः पाठकः प्रतिदिनं स्तोत्रमिदं पठति अथवा शृणोति सः कदापि अशुभं न प्राप्नोति । वेदान्तशास्त्रवित् ब्रह्मज्ञाने, क्षत्रियः युद्धे विजयी, वैश्यः धनसमृद्धवान् भवति । धर्मार्थी धर्मं, कामी कामान्, प्रजार्थी प्रजाश्च प्राप्नोति । अस्य पठनेन यशः, श्रीश्च प्राप्यते पाठकेन । श्रद्धावान् भक्तः कदापि न भयं प्राप्नोति । तस्य वीर्यं तेजश्च वर्धते । सः अरोगः, द्युतिमान्, बलवान्, गुणवांश्च भवति । रोगग्रस्तः रोगान्मुच्यते । बन्धनग्रस्तः बन्धान्मुक्तो भवति । एवं सर्वाण्यपि दुर्गतानि, दूरितानि, पापानि विनश्यन्ति ।[3] यथा –

**इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।**
**नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ।।**
**य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।**
**नाशुभं प्राप्नुयात्किञ्चित्सोऽसुत्रेह च मानवः ।।**
**वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।**
**वैश्यो धनसमृद्धः स्याच्छूद्रस्सुखमवाप्नुयात् ।।**
**धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।**
**कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम् ।।** इत्यादि ।

एवम् अन्येषु स्तोत्रेष्वपि स्तोत्रकाव्यानां प्रयोजनं बहुधा प्रतिपादितमस्ति ।

**स्तोत्रकाव्यस्य लक्षणम्**

अलङ्कारशास्त्रवाङ्गमये काव्यस्य प्राधान्येन भेदद्वयं कल्पितमस्त। यथा-

(1) दृश्यकाव्यम् (2) श्रव्यकाव्यञ्च ।

दृश्यकाव्येषु नाटकादीनि अन्तर्भवन्ति । स्तोत्रकाव्यं श्रव्यकाव्यभेदे परिगण्यते । एतच्छ्रव्यकाव्यं सर्वादौ गद्य-पद्य-भेदाभ्यां द्विधा विभज्यते । पद्यकाव्ये महाकाव्यं, खण्डकाव्यञ्च स्वीक्रियेते । तत्रापि मुक्तकम्, युग्मकम्, सान्दानितकम्, कलापकम्, कुलकमिति भेदाः साहित्यदर्पणे कल्पिताः । पद्यकाव्यं छन्दोबद्धं भवति । स्तोत्रकाव्यम् अपि छन्दोभिरेव रचितं पद्यं श्रव्यकाव्यकोटौ अन्तर्भवति । एतत् कदाचित् महाकाव्यं कुत्रचित्खण्डकाव्यमन्यत्र मुक्तकं, युग्मकं, सान्दानतिकं, कलापकमथवा कुलकं भवति । स्तोत्रकाव्येषु प्रायशः मुक्तकपद्यानि दृश्यन्ते । एतेषु प्रायशः देवदेवीनां गुणाः, कर्माणि च प्रतिपाद्यन्ते । एतानि मङ्गलपद्यानि इति अभिधीयन्ते । विषयवस्तु दृष्ट्या एतेषु स्तोत्रेषु पाठकेन कुत्रचित् आशीर्वादकामना अन्यत्र नमस्कारः अपरत्र च वस्तुप्राप्त्यर्थं प्रार्थना क्रियते । नाटकेषु कृता स्तुतिः, विहितं स्तोत्रं वा नान्दीति कथ्यते । अस्य लक्षणमुक्तं साहित्यदर्पणे -

**आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।**
**देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।**
**माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।**
**पदैर्युक्ता द्वादशभिष्टाभिर्वा पदैरूत ।।**[4]

स्तोत्रेषु नमः, स्वस्ति, स्वधा, स्वाहा इत्यादयः शब्दाः प्राप्यन्ते । बहुत्र जी-जये, आपु-रक्षणे, रक्ष-रक्षणे, त्रयि-त्राणे इत्यादीनां धातूनां स्तोत्रेषु प्रयोगः दृश्यते । अलङ्कार- शास्त्रेषु स्तोत्रकाव्यस्य विधिवद्धतया किमपि लक्षणं न प्राप्यते । आपस्तम्बधर्मसूत्रे उच्यते-

**आत्मलाभत्परो लाभो नास्तीति मुनयो विदुः ।**
**तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरम् ।।**[5]

अनेन स्तोत्रं भगवत्स्तुतिपरकमिति लक्षितम् । प्राचीनशास्त्रकाराः स्तोत्रस्य लक्षणं षड्विधिमिति प्रतिपादयन्ति । यथा -

**नमस्कारस्तथाशीश्च सिद्धान्तोक्तः पराक्रमः ।**
**विभूतिः प्रार्थना चेति षड्विधं स्तोत्रलक्षणम् ।।**[6]

यथा पूर्वमुक्तम् आलङ्कारिकलक्षणग्रन्थेषु काव्यानाम्, नाटकानां च लक्षणानि बहुभिः आलङ्कारीकैः निरूपितान्यासन् परन्तु स्तोत्राणाम् अनेकविधत्वात् स्तोत्रसामान्य- लक्षणं निर्देष्टुं न साध्यते। तथापि कैश्चित्पूर्वाचार्यैः **"गुणिनिष्ठगुणाभिधानं स्तोत्रम्"** इति स्तोत्रलक्षणमुक्तम् ।

**स्तोत्रकाव्यस्य उद्भवो विकासश्च**

संस्कृतवाङ्मये अगणितानि स्तोत्राणि रचितानि सन्ति । स्तोत्रकाव्यस्य रचनायाः आरम्भः कदा जातः इति वक्तुं न शक्यते । अस्माकं सर्वप्राचीनग्रन्थाः भवन्ति वेदाः । संस्कृतवाङ्मये ये केऽपि ग्रन्थाः सन्ति, तेषां मौलिकानि स्रोतांसि वेदा एव भवन्ति । अतः उच्यते **"सर्वं वेदात्प्रसिध्यति"** इति । अपि च उच्यते – "सर्वज्ञानमयो हि सः" इति । एवं प्रकारेण स्तुतीनां स्तोत्राणां वा प्रादुर्भावोऽपि सर्वादौ वेदेष्वेव दृश्यते । वेदाः चतुर्विधाः भवन्ति । यथा - ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च । एतेषां प्रधानतया उपयोगः यज्ञकर्मणि क्रियते । अत्र प्रतिपादिताः सर्वेऽपि विषयाः देवतास्तुतिमूलका एव भवन्ति । ऋग्वेदस्य प्रधानः विषयः 'शस्त्रम्' इति उच्यते । शस्त्रं नाम अप्रगीतमन्त्रसाध्या स्तुतिः। अर्थात् ऋग्वेदे विद्यमानां मन्त्राणां गानं विना पठनं क्रियते । होतृनामकः ऋत्विक् यज्ञे देवतानाम् आह्वानाय तुष्टये च एतेषाम् ऋचां पठनं करोति ।

एवमेव गीतप्रधानः सामवेदोऽपि देवतास्तुतिमूलको भवति । अत्र मन्त्राणां पठनं उद्गातृनामकेन ऋत्विजा क्रियते । अतः अत्र स्तुतिः गानमूला भवति । गान्धार-मध्यम-निषाद-षड्ज-ऋषभ-धैवत-पञ्चमाख्यैः सप्तस्वरैः मन्त्रगानपूर्वकं देवतानां स्तुतिः एव सामवेदस्य प्रधानं लक्ष्यं भवति ।

अथर्ववेदेऽपि देवस्तुतिमूलकानि सूक्तानि प्राप्यन्ते । लौकिकसूक्तानां यत्प्रयोजनम् अस्ति तदेव प्रयोजनं वैदिकसूक्तानां भवति। वेदानामनन्तरमुपनिषदः रचिताः । एतासु उपनिषत्सु अपि ब्रह्मस्तुतिपरकाणि नैकानि स्तोत्राणि प्राप्यन्ते । अत्र आत्मनः स्तुतिः प्राधान्यं भजते । ततः परं स्मृतिग्रन्थेषु मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, पराशरस्मृतिः इत्यादयः प्रधानाः भवन्ति । स्मृतिषु आचार-व्यवहार-प्रायश्चित्तादयः नैके विषयाः पर्यालोच्यन्ते । अत्र वर्णव्यवस्था, आश्रमव्यवस्था च सुष्ठु प्रतिपाद्येते । गृहस्थाश्रमे पापान्मुक्त्यर्थं पञ्चमहायज्ञेषु देवयज्ञः अन्यतमः स्मृतिषु उल्लिखितः। अस्मिन् महायज्ञे वैदिकपद्धत्या होमकार्यं क्रियते । अस्मिन् सन्दर्भे स्तुतीनां, स्तोत्राणां च महद्वैशिष्ट्यम् अस्ति इति धर्मशास्त्रप्रमाणम् ।

ततः परं व्यासदेवेन अष्टादशपुराणानि रचितानि । यथा - ब्रह्मपुराणम्, पद्मपुराणम्, अग्निपुराणम्, भविष्यपुराणम्, ब्रह्मवैवर्त्तपुराणम्, नारदपुराणम्, मार्कण्डेयपुराणम्, विष्णुपुराणम्, वायुपुराणम्, भागवतपुराणम्, लिङ्गपुराणम्, वराहपुराणम्, स्कन्दपुराणम्, वामनपुराणम्, कूर्मपुराणम्, मस्त्यपुराणम्,

गरुडपुराणम्, ब्रह्माण्डपुराणञ्च । एतानि पुराणानि विहाय उपपुराणानि, उपोपपुराणानि अपि बहूनि भवन्ति । एतेषु सर्वेषु पुराणेषु स्तोत्राणां महासमुद्रः अवाप्यते । श्रीविष्णुः, श्रीमहेश्वरः, परब्रह्म, परमेश्वरः, श्रीदुर्गा, दशमहाविद्याः, श्रीगणेशः, श्रीकार्तिकेयः, आदित्यः इत्येवं प्रकारेण बहूनां देवदेवीनां स्तुतिः पुराणेषु एव अधिकाधिकतया प्राप्यते । चतुर्षु धामसु विद्यमानानां श्रीकृष्ण-श्रीसोमनाथ-श्रीबद्रिकेश-श्रीजगन्नाथादिदेवानां स्तुतिपुरस्सरं तत्तद् धाम्नां गुणगौरववर्णनं पुराणेषु एव लभ्यते । श्रीमद्रामायणे, श्रीमन्महाभारते, अन्येषु बहुषु काव्येषु अपि नैकानि स्तोत्राणि प्राप्यन्ते । विशिष्टतया श्रीमच्छङ्कराचार्यभगवत्पादैः, श्रीमद्रामानुजाचार्यैः, श्रीमन्निम्बार्काचार्यैः, श्रीचैतन्यमहा- प्रभुभिः एवं च नैकैः वेदान्तशास्त्र- विद्वद्भिः बहूनि स्तोत्राणि रचितानि । कालक्रमेण अनेके भक्तप्रवराः कवयः स्तोत्रकाव्य- परम्परायाः समृद्धिम् अकुर्वन् कुर्वन्ति च ।

एवं वैदिककालात् प्रारभ्य आधुनिकसंस्कृतसाहित्यं यावत् स्तोत्रवाङ्मयस्य विशालाकाशे नैकानि भक्तिरसपरिप्लुतानि नैकविधानि काव्यानि नक्षत्रतुल्यानि देदीप्यन्ते । समालोचकाः एतेषां स्तोत्राणां वर्गीकरणं पञ्चसु भागेषु कुर्वन्ति ।

यथा -

1. वैदिकस्तोत्राणि
2. पौराणिकस्तोत्राणि
3. रामायण,महाभातोक्तानि स्तोत्राणि
4. काव्येप्रयुक्तानि स्तोत्राणि
5. स्वतन्त्रतया रचितानि स्तोत्राणि

## उपसंहारः (Conclusion)

**निष्कर्षतः** भारतीयसंस्कृतौ स्तोत्रकाव्यपरम्परा न केवलं धार्मिक्या दृष्ट्या, अपितु साहित्यिक-सांस्कृतिक-दृष्ट्यापि महतीं समृद्धिं भजते। वेदानां पावनमन्त्रेभ्यः प्रवृत्ता एषा स्तुतिधारा उपनिषत्-स्मृति-पुराण-महाकाव्यानां सरणिम् अनुरुद्ध्य आधुनिककालं यावत् अविरलभावेन प्रवहन्ती वर्तते। लौकिककाव्यशास्त्रानुसारं श्रव्यकाव्यकोटौ अन्तर्भूतमपि एतत् स्तोत्रवाङ्मयम् आत्मिकपरिपूरकत्वात् विशिष्टं स्थानं वहति । अस्य काव्यस्य पठनेन श्रवणेन च मानवः मानसिकशान्तिं, पापविमुक्तिं, चित्तशुद्धिं च प्राप्य इहामुत्र च परमं कल्याणं साधयितुं शक्नोति । पूर्वाचार्यैः निरूपितं षड्विधं स्तोत्रलक्षणम् अस्य विधायाः कलात्मकं गाम्भीर्यं सुचारु प्रकटीकरोति । अतः ज्ञान-भक्ति-काव्यानां त्रिवेणीरूपा एषा स्तोत्रकाव्यपरम्परा भारतीयवाङ्मयस्य अमूल्यनिधिरूपेण सहृदयानां मानसे सर्वदा देदीप्यते ।

## सहायकग्रन्थसूची


(१) अमरकोशः (नामलिङ्गानुशासनम्) । अमरसिंहः । व्याख्याकारः: आचार्य-सत्यदेव-मिश्रः (अथवा अन्यः प्रामाणिकः व्याख्याकारः) । प्रकाशकः: चौखम्बा विद्याभवन, वाराणसी ।

(२) अग्निपुराणम् । संपादकः/अनुवादकः: श्रीरामनारायणदत्तः शास्त्री 'पाण्डेयः' । प्रकाशकः: गीताप्रेस, गोरखपुरम्

(३) महाभारतम् (विष्णुसहस्रनामस्तोत्रम्) (अनुशासनपर्वणि अन्तर्गतं विष्णुसहस्रनामस्तोत्रम्) । प्रकाशकः: गीताप्रेस, गोरखपुरम्

(४) साहित्यदर्पणम्। कविराज-विश्वनाथ-महापात्रः । व्याख्याकारः: आचार्य-कृष्णमोहन-शास्त्री । प्रकाशकः: चौखम्बा संस्कृत संस्थान, वाराणसी

(५) आपस्तम्बधर्मसूत्रम् । संपादकः/व्याख्याकारः: उमेशचन्द्र-पाण्डेयः । प्रकाशकः: चौखम्बा संस्कृत सिरीज ऑफिस, वाराणसी ।

(६) ललितासहस्रनामस्तोत्रम् (सौभाग्यभास्करव्याख्या) (भास्कर-राय-कृत 'सौभाग्यभास्कर' व्याख्या- सहितम्) । संपादकः: पं. वासुदेवशर्मा लक्ष्मणशास्त्री पणशीकरः । प्रकाशकः: निर्णयसागर प्रेस, मुम्बई (पुनर्मुद्रणम्: चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली)


## पाद टिप्पणी -

1. अ.को. शब्दादिवर्गे श्लो. 11
2. अ.पु. – 172/19-21
3. वि.स.ना.स्तो. फलश्रुतिभागः
4. सा.द. – 6/24-25
5. आ.ध.सू. – 1/22/2
6. ल.स.ना.स्तो. श्लो.223 सौभाग्यभास्करव्याख्या पृ.289